संस्कृत वार्ताः

23.04.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· केन्द्रीय-गृहमन्त्री अमितशाह: पहलगाम-मध्ये आतंकवाद्याक्रमणस्य सुरक्षा स्थितिं समैक्षत।

· रक्षा-मन्त्री राजनाथ-सिंह: प्रत्यपादयत् यत् सर्वकारः पहलगाम आतङ्क्याक्रमणे उत्तरदायिभ्यो मुखभञ्जन-करम् उत्तरं दातुं तत्परम्।

· पहलगाम-पर्यटक-हत्याकांडस्य विरोधे अद्य जम्मू-कश्मीरं पूर्णतोदृशा पिहितम्।

· पहलगाम-आतंकवाद्याक्रमणे देशे व्याप्नोति शोकलहरी, विश्व-नेतृभिश्चापि प्रकटिता: संवेदना:।

· ट्रम्पस्य टैरिफ इति परस्परं भृशं शुल्क-प्रवर्तनं नीतिगताम् अनिश्चिततां च निध्याय आई.एम.एफ. इति अन्ताराष्ट्रिय - मुद्रा-कोषेण वैश्विक-विकास-परिमितौ कृतं कर्तनम्।

· आई.एस.एस.एफ. इति अन्ताराष्ट्रिय-लक्ष्य-वेधन-क्रीडा-महासंघेन अनुष्ठिते विश्व-चषके भारतेन पेरू-देशे स्वर्ण-पदक-द्वयं, रजत-पदक-चतुष्कं एकं कांस्य-पदकं च समेत्य सप्त-पदकै: साकं नैजम् अभियानं समापितम्।

<u>जम्मकश्मीरे- गृहमन्त्री</u>

केन्द्रीय-गृहमन्त्री अमित-शाह: प्रावोचत् यत् प्रत्येकमपि भारतीया: दक्षिण-कश्मीरस्य अनन्तनाग-जनपदस्य पहलगाम-क्षेत्रे दुरापन्नातङ्क-वाद्याक्रमणे निज-प्रियजनानां मृत्यो: दुःखं अनुभवन्ति। अमुना निखिलमपि देशं समेत्य एते सर्वेSपि पीडित-परिवारा: समाश्वासिता: यत् निर्दोष-जनानां हत्या-कर्तारः इमे आतङ्किनो नूनमेव दण्डयिष्यन्ते । आतंकवादिनो एवमेव नैव विमोक्ष्यन्ते। केन्द्रीय गृहमन्त्री अमितशाह:, जम्मू-कश्मीरस्य मुख्यमन्त्री उमर अब्दुल्लाह, उपराज्यपाल: मनोज-सिन्हा च श्रीनगरस्य आरक्षि नियन्त्रण-कक्षस्य पी.सी.आर. इत्यस्य निरीक्षणयात्रां कृतवन्तः। इमे पहलगाम-क्षेत्रे दुरापन्नातङ्क्याक्रमणे मृतकेभ्य: पर्यटकेभ्य: श्रद्धांजलीन् समर्पितवन्त: । मंगलवासरे दुरापन्नातङ्क्याक्रमणे मारितानां जनानां शवा: तेषां गृहराज्येषु

सम्मान-जनक-रीत्या प्रेषयितुम् आधिकारिक-व्यवस्थाया: अन्तर्गतं अत्र पी.सी.आर. मध्ये समानीता: आसन्। गृहमन्त्री अमितशाह: जम्मू-कश्मीरस्य नेतारश्च श्रीनगरे पहलगामातंकवाद्याक्रमणे मृतकेभ्य: श्रद्धांजलीन् समार्पयन्। भारतम् आतंकस्य पुरतः कदापि नतो नैव भविष्यति। गृहमंत्री अद्य जम्मू-कश्मीरस्य बैसरन वन क्षेत्रे आक्रमण-क्षेत्रस्य स्थितिमपि निरैक्षत। अमुना सर्वकारीय-चिकित्सा-महाविद्यालय-अनंत-नाग-उपचारालये उपचाराधीनानां व्रणितानां जनानां स्वास्थ्य-विषयेऽपि संज्ञानं स्वीकृतम्। विश्वसनीय-आधिकारिक-स्रोतसाम् अनुसारेण, ह्य: पहलगाम-आक्रमणे स्थानीय-जनद्वयं समेत्य षड्विंशतिः पर्यटका: पञ्चतां प्राप्ता: आसन्। आरक्षि-बलेन , चाराभिकरणेन च आक्रान्तृ-आतङ्कि-त्रयस्य अन्वेषणार्थं स्केच-चित्रम् प्रख्यापितम् अस्ति।

<u>राजनाथ – सुरक्षा-समीक्षा :</u>

रक्षामन्त्री राजनाथसिंहः अद्य आतङ्कवादं विरुध्य भारतस्य शून्य-सहिष्णुता-नीति-विषये साम्रेडितवान्। तेन प्रोक्तं यत् पहलगाम-आक्रमणस्य उत्तरदायिभ्यः मुखभञ्जन-करम् उत्तरं दातुं प्रशासनम् किमपि करणीयं न त्यक्ष्यति। सर्वविधमपि पदक्षेपम् उत्थापयितुं शासनं तत्परम् अस्ति। रक्षास्रोतांसि प्रोक्तवन्ति यत्, सेनाप्रमुखेण जनरल् उपेन्द्रद्विवेदिना, नौसेनाप्रमुखेण एड्मिरल् दिनेशत्रिपाठिना, वायुसेनाप्रमुखेण एयर चीफ मार्शल एपी सिंहेन अन्यैः वरिष्ठाधिकारिभिः च पहलगाम आतंक्याक्रमणं निध्याय सुरक्षा-स्थितेः विषये श्रीसिंहस्य पुरत: विवरणं प्रस्तुतम्।

अत्रावसरे अद्य नवदिल्ल्यां भारतीय-वायुसैन्यबलेन आयोजिते भारतीय-वायुसेनायाः मार्शलस्य अर्जनसिंहस्य विषये स्मृतिव्याख्यानं सम्बोधयन् रक्षामन्त्री अस्याक्रमणस्य प्रतिकाराय सर्वाः व्यवस्थाः क्रियन्ते इति उक्तवान्। पहलगाम-क्षेत्रे आतङ्क्याक्रमणस्य निन्दां कुर्वन् श्रीसिंहः शोक-संतप्त-परिवारेभ्यः शोकसंवेदनां प्रकटितवान्।

<u>(शून्य) - 2100--राजनाथ सिंह</u>

पहलगाम-मध्ये पर्यटकानां हत्याया: विरोधे कश्मीरोपत्यकायां समस्ते दिने पूर्णपिधानं प्रवर्तितम्। अधिकांशापणानि स्थानीय-औद्योगिक-समवाया: विनिर्माण-एकांशा: च पिहिता: सन्ति। सार्वजनिकं परिवहनमपि मार्गेषु शून्यम् अस्ति। जम्मू-कश्मीरस्य मुख्यमंत्री उमर अब्दुल्ला केन्द्र-शासित-प्रदेशस्य सर्वकारीय-कार्यालयानां कर्मकरान् अध्यार्थ्यत् यत् ते अद्य अपराह्न-सार्ध-त्रि-वादने राष्ट्रस्य ऐक्यबद्धतार्थं मिनट-द्वयस्य मौनमाचरन्तु इति।

## विश्वनेतृभि: आतङ्क्याक्रमणं भर्त्सितम्

विश्वनेतृभि: जम्मू-कश्मीरे आतङ्क्याक्रमणं भर्त्सितम्। विश्वस्य प्रमुखनेतृभि: जम्मू-कश्मीरे ह्य: दुरापन्नस्य आतङ्क्याक्रमणस्य निन्दा विहितास्ति। अमेरिकीय-राष्ट्रपति: डोनाल्ड-ट्रम्प: प्रधानमन्त्रिणा नरेन्द्रमोदिना साकं दौरभाषिकं सम्भाषणम् आचरितवान्। निर्दोष-जनानां हत्याविषये च गम्भीरां संवेदनां व्यक्तीकृतवान्। अथ: च आतङ्किनो विरुध्य कार्याचरणे अमेरिकादेशस्य पूर्ण-समर्थनमपि आश्वासितवान्। ब्रिटेन-देशस्य प्रधान-मन्त्रिणा कीर स्टारमर इत्यनेन अपि स्वीय-संवेदना: व्यक्तीकृता: , जर्मन चांसलर राष्ट्राध्यक्ष: ओलाफ स्कोल्ज: अपि आक्रमणमिदं भृशं भर्त्सितवान्। अमुना पहलागामा-तङ्क्याक्रमणे पर्यटकानां हत्याविषये संवेदना: चापि व्यक्ता:। यूरोपीय-संघायोगस्य प्रमुखा अपि आक्रमणं निन्दितवती। संयुक्त-अरब-अमीरात-देशेन, ईरान-देशेन चापि अस्य आक्रमणस्य कट्वालोचना कृता अस्ति। इजरायल-इटली देशाभ्यामपि एतत् आक्रमणं भृशं निन्दितम् । संयुक्त-राष्ट्र-महासचिव: एंटोनियो गुटेरेस: अपि आक्रमणस्य भृशं निन्दापूर्वकं मृतकानां शोक-संतप्त परिवारान् प्रति संवेदनां व्यक्तीकृतवान्।

## आईएमएफ- विश्वविकासवृद्धिपरिमिति

ट्रम्पस्य टैरिफ इति परस्परं भृशं शुल्क-प्रवर्तनं नीतिगताम् अनिश्चिततां च निध्याय आई.एम.एफ. इति अन्ताराष्ट्रिय - मुद्रा-कोषेण वैश्विक-विकास-परिमितौ कृतं कर्तनम्। विदितमेव यत् अमेरिकी-राष्ट्रपतिना डोनाल्ड-ट्रम्पेण प्रायः सर्वेषामपि देशानां व्यापारिक-सहभागितासु अधिक-शुल्क-प्रवर्तनं कृतम् अस्ति। येन कारणेन विश्वे प्रवृत्तस्य व्यापारयुद्धस्य वातावरणं ध्यात्वा अन्ताराष्ट्रिय-मुद्राकोषेण स्वस्य विकासानुमानं न्युनीकृतम् अस्ति। पञ्चविंशत्यधिक-द्वि-सहस्र-तमे वर्षे IMF इति संस्थया विश्वोत्पादनस्य, विकासस्य च वृद्धे: अल्पता आकलिता अस्ति।

## शेखावत -जम्मू-कश्मीर-पर्यटनम्

केन्द्रीय-पर्यटन-मन्त्री गजेंद्र-सिंह-शेखावत: प्रावोचत् यत् पहलगाम आतङ्क्याक्रमणस्य अनन्तरं कश्मीरोपत्यकायां पर्यटनक्षेत्रे सम्भावितां हानिं न्यूनीकर्तुं केन्द्रम् निज-पक्षत: यथासम्भवं प्रयासान् करिष्यति। मन्त्री प्रत्यपादयत् यत् असौ जम्मू-कश्मीरस्य मुख्य-सचिवेन,

पर्यटनविभागेन च साकं सम्पर्के विद्यते। अमुना एतदपि प्रोदितं यत् भारतम् आतंकवादं प्रति शून्य-सहिष्णुतायुतं दृष्टिकोणं निदधाति।

## जम्मू-कश्मीर-अनुग्रहराशि

जम्मू-कश्मीर-प्रशासनेन पहलगामे जाते आतङ्क्याक्रमणे मृतकाणां परिवारेभ्य: दश-लक्ष-रूप्यकाणाम् अनुग्रह-राशे: घोषणा कृता। मुख्यमन्त्रिणा उमर-अब्दुल्ला-इत्यनेन उक्तं यत् गभीर-रूपेण व्रणितानां कृते द्वि-लक्ष-रूप्यकाणि, सामान्यरूपेण व्रणितानां कृते एकैक-लक्ष-रूप्यकाणि च सहयोगरूपेण प्रदास्यन्ते भविष्यन्ति। मुख्यमन्त्रिणा इदमपि उक्तं यत् पीड़ितानां पैतृक-स्थाने प्रेषणाय सर्वा: सज्जता: कृता सन्ति।

## नेवी-एलटी. नरवाल:

भारतीय-नौसेना-प्रमुखेण चीफ एडमिरल दिनेश के. त्रिपाठी वर्येण लेफ्टिनेंट विनय-नरवालाय अन्तिम: श्रद्धांजलि: समर्पितः । ध्येयमस्ति यत् एष: ह्य: पहलगाम-आतङ्क्याक्रमणे हुतिंगत: आसीत्। नौसेना-प्रमुखेण राष्ट्रिय-राजधानी-क्षेत्रस्य इंदिरा-गांधी अन्ताराष्ट्रीय-विमान-पत्तने लेफ्टिनेंट नरवालस्य पार्थिव-शरीरे पुष्पांजलय: समर्पिता:। अत्रावसरे दिल्ल्या: मुख्यमन्त्री रेखा गुप्ता अपि लेफ्टिनेंट नरवालाय अन्तिम-श्रद्धांजलीं समार्पयत्। पश्चात् नरवालस्य पार्थिव-शरीरम् हरियाणाया: करनालक्षेत्रं नेष्यते।

## आई.एस.एस.एफ.

आई.एस.एस.एफ. इति अन्ताराष्ट्रिय-लक्ष्य-वेधन-क्रीडा-महासंघस्य भुशुण्डिका-लक्ष्य-संधान-क्रीडाया: विश्व-चषके भारतेन पेरू-देशे स्वर्ण-पदक-द्वयं, रजत-पदक-चतुष्कं कांस्य-पदकमेकं च समेत्य सप्त-पदकै: साकं नैजम् लक्ष्य-संधान-क्रीडाभियानं समापितम्।

आईपीएल:

आई.पी.एल. इति विंशतिं प्रतिविंशति: क्रिकेट क्रीडा-स्पर्धायां अद्य सायं सार्ध-सप्त-वादने हैदराबादस्य राजीव गांधी इंटरनेशनल स्टेडियम इति क्रीडांगडे सनराइजर्स हैदराबाद दलस्य स्पर्धा मुंबई इंडियंस दलेन समं भविष्यति। विगते रात्रौ दिल्ली कैपिटल्स दलेन लखनऊ-सुपर-जायंट्स दलं लखनऊ नगरस्य एकाना स्टेडियम प्राङ्गणे अष्ट-क्रीडकै: पराभूय विजयोऽधिगत:।

।। इति वार्ता: ।।